# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ६६

निर्गतं मकराक्षं ते दृष्ट्वा वानरपुङ्गवाः ।
आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः ॥ १॥

ततः प्रवृत्तं सुमहत्तद्युद्धं लोमहर्षणम् ।
निशाचरैः प्लवङ्गानां देवानां दानवैरिव ॥ २॥

वृक्षशूलनिपातैश्च शिलापरिघपातनैः ।
अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः ॥ ३॥

शक्तिशूलगदाखड्गैस्तोमरैश्च निशाचराः ।
पट्टसैर्भिन्दिपालैश्च बाणपातैः समन्ततः ॥ ४॥

पाशमुद्गरदण्डैश्च निर्घातैश्चापरैस्तथा ।
कदनं कपिसिंहानां चक्रुस्ते रजनीचराः ॥ ५॥

बाणौघैरर्दिताश्चापि खरपुत्रेण वानराः ।
सम्भ्रान्तमनसः सर्वे दुद्रुवुर्भयपीडिताः ॥ ६॥

तान्दृष्ट्वा राक्षसाः सर्वे द्रवमाणान्वनौकसः ।
नेदुस्ते सिंहवद्धृष्टा राक्षसा जितकाशिनः ॥ ७॥

विद्रवत्सु तदा तेषु वानरेषु समन्ततः ।
रामस्तान्वारयामास शरवर्षेण राक्षसान् ॥ ८॥

वारितान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः ।
क्रोधानलसमाविष्टो वचनं चेदमब्रवीत् ॥ ९॥

तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं ददामि ते ।
त्याजयिष्यामि ते प्राणान्धनुर्मुक्तैः शितैः शरैः ॥ १०॥

यत्तदा दण्डकारण्ये पितरं हतवान्मम ।
मदग्रतः स्वकर्मस्थं स्मृत्वा रोषोऽभिवर्धते ॥ ११॥

दह्यन्ते भृशमङ्गानि दुरात्मन्मम राघव ।
यन्मयासि न दृष्टस्त्वं तस्मिन्काले महावने ॥ १२॥

दिष्ट्यासि दर्शनं राम मम त्वं प्राप्तवानिह ।
काङ्क्षितोऽसि क्षुधार्तस्य सिंहस्येवेतरो मृगः ॥ १३॥

अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः ।
ये त्वया निहताः शूराः सह तैस्त्वं समेष्यसि ॥ १४॥

बहुनात्र किमुक्तेन शृणु राम वचो मम ।
पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे ॥ १५॥

अस्त्रैर्वा गदया वापि बाहुभ्यां वा महाहवे ।
अभ्यस्तं येन वा राम तेन वा वर्ततां युधि ॥ १६॥

मकराक्षवचः श्रुत्वा रामो दशरथात्मजः ।
अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनम् ॥ १७॥

चतुर्दशसहस्राणि रक्षसां त्वत्पिता च यः ।
त्रिशिरा दूषणश्चापि दण्डके निहता मया ॥ १८॥

स्वाशितास्तव मांसेन गृध्रगोमायुवायसाः ।
भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुशाः ॥ १९॥

एवमुक्तस्तु रामेण खरपुत्रो निशाचरः ।
बाणौघानसृजत्तस्मै राघवाय रणाजिरे ॥ २०॥

ताञ्शराञ्शरवर्षेण रामश्चिच्छेद नैकधा ।
निपेतुर्भुवि ते छिन्ना रुक्मपुङ्खाः सहस्रशः ॥ २१॥

तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा ।
खर राक्षसपुत्रस्य सूनोर्दशरथस्य च ॥ २२॥

जीमूतयोरिवाकाशे शब्दो ज्यातलयोस्तदा ।
धनुर्मुक्तः स्वनोत्कृष्टः श्रूयते च रणाजिरे ॥ २३॥

देवदानवगन्धर्वाः किंनराश्च महोरगाः ।
अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम् ॥ २४॥

विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते बलम् ।
कृतप्रतिकृतान्योन्यं कुर्वाते तौ रणाजिरे ॥ २५॥

राममुक्तास्तु बाणौघान्राक्षसस्त्वच्छिनद्रणे ।

रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः ॥ २६॥

बाणौघवितताः सर्वा दिशश्च विदिशस्तथा ।
सञ्छन्ना वसुधा चैव समन्तान्न प्रकाशते ॥ २७॥

ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद रक्षसः ।
अष्टाभिरथ नाराचैः सूतं विव्याध राघवः ।
भित्त्वा शरै रथं रामो रथाश्वान्समपातयत् ॥ २८॥

विरथो वसुधां तिष्ठन्मकराक्षो निशाचरः ।
अतिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना ।
त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम् ॥ २९॥

विभ्राम्य च महच्छूलं प्रज्वलन्तं निशाचरः ।
स क्रोधात्प्राहिणोत्तस्मै राघवाय महाहवे ॥ ३०॥

तमापतन्तं ज्वलितं खरपुत्रकराच्च्युतम् ।
बाणैस्तु त्रिभिराकाशे शूलं चिच्छेद राघवः ॥ ३१॥

सच्छिन्नो नैकधा शूलो दिव्यहाटकमण्डितः ।
व्यशीर्यत महोल्केव रामबाणार्दितो भुवि ॥ ३२॥

तच्छूलं निहतं दृष्ट्वा रामेणाद्भुतकर्मणा ।
साधु साध्विति भूतानि व्याहरन्ति नभोगताः ॥ ३३॥

तद्दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः ।
मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३४॥

स तं दृष्ट्वा पतन्तं वै प्रहस्य रघुनन्दनः ।
पावकास्त्रं ततो रामः सन्दधे स्वशरासने ॥ ३५॥

तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे ।
सञ्छिन्नहृदयं तत्र पपात च ममार च ॥ ३६॥

दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम् ।
लङ्कामेव प्रधावन्त रामबालार्दितास्तदा ॥ ३७॥

दशरथनृपपुत्रबाणवेगै
रजनिचरं निहतं खरात्मजं तम् ।
ददृशुरथ च देवताः प्रहृष्टा
गिरिमिव वज्रहतं यथा विशीर्णम् ॥ ३८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com